श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### द्विपञ्चाशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## द्विपञ्चाशः सर्गः

*दूतवधानौचित्यं प्रतिपाद्य विभीषणेन तस्य कृते दण्डान्तरविधानाय रावणं प्रति प्रार्थनं रावणेन तदनुरोधस्य स्वीकरणं च*

स तस्य वचनं श्रुत्वा वानरस्य महात्मनः।
आज्ञापयद् वधं तस्य रावणः क्रोधमूर्च्छितः॥ ५.५२.१ ॥

वधे तस्य समाज्ञप्ते रावणेन दुरात्मना।
निवेदितवतो दौत्यं नानुमेने विभीषणः॥ ५.५२.२ ॥

तं रक्षोऽधिपतिं क्रुद्धं तच्च कार्यमुपस्थितम्।
विदित्वा चिन्तयामास कार्यं कार्यविधौ स्थितः॥ ५.५२.३ ॥

निश्चितार्थस्ततः साम्ना पूज्यं शत्रुजिदग्रजम्।
उवाच हितमत्यर्थं वाक्यं वाक्यविशारदः॥ ५.५२.४ ॥

क्षमस्व रोषं त्यज राक्षसेन्द्र
प्रसीद मे वाक्यमिदं शृणुष्व।
वधं न कुर्वन्ति परावरज्ञा
दूतस्य सन्तो वसुधाधिपेन्द्राः॥ ५.५२.५ ॥

राजन् धर्मविरुद्धं च लोकवृत्तेश्च गर्हितम्।
तव चासदृशं वीर कपेरस्य प्रमापणम्॥ ५.५२.६ ॥

धर्मज्ञश्च कृतज्ञश्च राजधर्मविशारदः।
परावरज्ञो भूतानां त्वमेव परमार्थवित्॥ ५.५२.७ ॥

www.prapatti.com

गृह्यन्ते यदि रोषेण त्वादृशोऽपि विचक्षणाः।
ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलम्॥ ५.५२.८ ॥

तस्मात् प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद।
युक्तायुक्तं विनिश्चित्य दूतदण्डो विधीयताम्॥ ५.५२.९ ॥

विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः।
कोपेन महताऽऽविष्टो वाक्यमुत्तरमब्रवीत्॥ ५.५२.१० ॥

न पापानां वधे पापं विद्यते शत्रुसूदन।
तस्मादिमं वधिष्यामि वानरं पापकारिणम्॥ ५.५२.११ ॥

अधर्ममूलं बहुदोषयुक्त-
　　मनार्यजुष्टं वचनं निशम्य।
उवाच वाक्यं परमार्थतत्त्वं
　　विभीषणो बुद्धिमतां वरिष्ठः॥ ५.५२.१२ ॥

प्रसीद लङ्केश्वर राक्षसेन्द्र
　　धर्मार्थतत्त्वं वचनं शृणुष्व।
दूता न वध्याः समयेषु राजन्
　　सर्वेषु सर्वत्र वदन्ति सन्तः॥ ५.५२.१३ ॥

असंशयं शत्रुरयं प्रवृद्धः
　　कृतं ह्यनेनाप्रियमप्रमेयम्।
न दूतवध्यां प्रवदन्ति सन्तो
　　दूतस्य दृष्टा बहवो हि दण्डाः॥ ५.५२.१४ ॥

वैरूप्यमङ्गेषु कशाभिघातो
　　मौण्ड्यं तथा लक्षणसन्निपातः।
एतान् हि दूते प्रवदन्ति दण्डान्
　　वधस्तु दूतस्य न नः श्रुतोऽस्ति॥ ५.५२.१५ ॥

कथं च धर्मार्थविनीतबुद्धिः
　　परावरप्रत्ययनिश्चितार्थः।

भवद्विधः कोपवशे हि तिष्ठेत्
    कोपं न गच्छन्ति हि सत्त्ववन्तः॥ ५.५२.१६ ॥

न धर्मवादे न च लोकवृत्ते
    न शास्त्रबुद्धिग्रहणेषु वापि।
विद्येत कश्चित्तव वीर तुल्य-
    स्त्वं ह्युत्तमः सर्वसुरासुराणाम्॥ ५.५२.१७ ॥

पराक्रमोत्साहमनस्विनां च
    सुरासुराणामपि दुर्जयेन।
त्वयाप्रमेयेण सुरेन्द्रसङ्घा
    जिताश्च युद्धेष्वसकृन्नरेन्द्राः॥ ५.५२.१८ ॥

इत्थंविधस्यामरदैत्यशत्रोः
    शूरस्य वीरस्य तवाजितस्य।
कुर्वन्ति वीरा मनसाप्यलीकं
    प्राणैर्विमुक्ता न तु भोः पुरा ते॥ ५.५२.१९ ॥

न चाप्यस्य कपेर्घाते कञ्चित् पश्याम्यहं गुणम्।
तेष्वयं पात्यतां दण्डो यैरयं प्रेषितः कपिः॥ ५.५२.२० ॥

साधुर्वा यदि वासाधुः परैरेष समर्पितः।
ब्रुवन् परार्थं परवान् न दूतो वधमर्हति॥ ५.५२.२१ ॥

अपि चास्मिन् हते नान्यं राजन् पश्यामि खेचरम्।
इह यः पुनरागच्छेत् परं पारं महोदधेः॥ ५.५२.२२ ॥

तस्मान्नास्य वधे यत्नः कार्यः परपुरञ्जय।
भवान् सेन्द्रेषु देवेषु यत्नमास्थातुमर्हति॥ ५.५२.२३ ॥

अस्मिन् विनष्टे नहि दूतमन्यं
    पश्यामि यस्तौ नरराजपुत्रौ।
युद्धाय युद्धप्रिय दुर्विनीता-
    वुद्योजयेद् वै भवता विरुद्धौ॥ ५.५२.२४ ॥

पराक्रमोत्साहमनस्विनां च
सुरासुराणामपि दुर्जयेन।
त्वया मनोनन्दन नैर्ऋतानां
युद्धाय निर्नाशयितुं न युक्तम्॥ ५.५२.२५ ॥

हिताश्च शूराश्च समाहिताश्च
कुलेषु जाताश्च महागुणेषु।
मनस्विनः शस्त्रभृतां वरिष्ठाः
कोपप्रशस्ताः सुभृताश्च योधाः॥ ५.५२.२६ ॥

तदेकदेशेन बलस्य तावत्
केचित् तवादेशकृतोऽद्य यान्तु।
तौ राजपुत्रावुपगृह्य मूढौ
परेषु ते भावयितुं प्रभावम्॥ ५.५२.२७ ॥

निशाचराणामधिपोऽनुजस्य
विभीषणस्योत्तमवाक्यमिष्टम्।
जग्राह बुद्ध्या सुरलोकशत्रु-
र्महाबलो राक्षसराजमुख्यः॥ ५.५२.२८ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विपञ्चाशः सर्गः॥

www.prapatti.com